अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BV 103**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा - दिसम्बरमासः - 2017**
**बी. ए. व्याकरणम् (सत्रम् : प्रथमम्)**
**संस्कृतम् (तृतीयपत्रम्)**
**संस्कृत-साहित्यम्**

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 75**

**अवधेयम् : पत्रमिदं पञ्चसप्तत्यङ्कानां विद्यते, अस्मिन् गद्यम्, पद्यम्, नाटकम्, काव्यशास्त्रम्, आयुर्वेदश्चेति पञ्च खण्डाः सन्ति' प्रत्येकं खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्, अङ्कनिर्धारणं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतो द्रष्टुं शक्यते।**

## खण्डः-अ

**(गद्यम्)** **15 अङ्काः**

1. (क) गद्यसाहित्यस्योत्पत्तिविषये सप्रमाणं विवेचनं कुरुत। (05)

अथवा

कौटलीयार्थशास्त्रविषये लघुनिबन्धो लेख्यः।

(ख) वाक्यान्वयालङ्कारादिनिर्देशपूर्वकं कस्यचिदेकस्य श्लोकस्य व्याख्या कार्या - (05)

(i) चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः। स्वधर्मकर्माभिरतो वर्तते स्वेषु कर्मसु।।

(ii) तस्मात्कोपञ्च कामञ्च व्यसनारम्भमात्मवान्। परित्यजेन्मूलहरं वृद्धसेवी जितेन्द्रियः।।

(ग) अधोलिखितेषु केषाञ्चन पञ्चानां लघूत्तराणि लेखनीयानि - (05)

(i) कोषाभावे दण्डस्य का स्थितिर्भवति?

(ii) व्यसनाधिकरणे के कोपदोषाः?

(iii) किन्नाम 'अर्थदूषणम्'?

(iv) कानि वेदाङ्गानि प्रोक्तानि, नामोल्लेखः कार्यः?

(v) के संन्यासिनो धर्माः?

(vi) को नाम मात्स्यन्यायः?

(vii) को नामेतिहासः?

(viii) अर्थ एव प्रधानम् - इति कस्य मतम्?

## खण्डः-'ब'

**(पद्यम्)** **15 अङ्काः**

2. (क) पद्यसाहित्यस्योत्पत्तिविषयः संक्षेपेण प्रतिपादनीयः । (05)

अथवा

वाल्मीकीयरामायणस्य कथावस्तुनः (प्रथमसर्गानुसारम्) समीक्षा कार्या।

(ख) छन्दोऽलङ्कारव्याकरणात्मकटिप्पण्यादिपुरस्सरं काचिदपि श्लोकद्वयी सप्रसङ्गा व्याख्येया (10)

(i) सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः।।

(ii) विभेद च पुनस्तालान्सप्तैकेन महेषुणा।
गिरिं रसातलञ्चैव जनयन्प्रत्ययं तदा।।

(iii) अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात्।
मर्षयन्राक्षसान् वीरो यन्त्रिणस्तान्यदृच्छया।।

## खण्डः–स

### (नाटकम्) 15 अङ्काः

3. (क) श्रीभासस्य संक्षिप्तं जीवनपरिचयं कृतित्वञ्च प्रतिपादयत। (05)

(ख) छन्दोऽलङ्कारादिनिर्देशपुरस्सरं काचिदपि श्लोकद्वयी सप्रसंङ्गा व्याख्येया - $\left(2\frac{1}{2}+2\frac{1}{2}=05\right)$

(i) कृतपरिकरबन्धौ चर्मनिस्त्रिंशहस्तौ, परुषितमुखरागौ स्पष्टदष्टाधरोष्ठौ।
विगतमरणशङ्कौ सत्वरं भ्रातरं मे, हरिमिव मृगपोतौ तेजसाभिप्रयातौ।।

(ii) मत्कार्मुकोदरविनिःसृतबाणजालैर्विद्धक्षरत्क्षतजरञ्जितसर्वगात्रम्।
पश्यन्तु पाण्डुतनया शिविरोपनीतं त्वां बाष्परुद्धनयना परिनिःश्वसन्तः।।

(iii) पूर्णेन्दुकुन्दकुमुदोदरहारगौरो, नारायणाननसरोजकृतप्रसादः।
यस्य स्वनं प्रलयसागरघोरतुल्यं गर्भा निशम्य निपतन्त्यसुराङ्गनानाम्।।

(ग) दुर्योधनस्य चरित्रचित्रणं कुरुत। (05)

अथवा

दूतवाक्यनाटकस्य कथासारो लेखनीयः।

## खण्डः–द

### (काव्यशास्त्रम्) 15 अङ्काः

4. (क) काव्यशास्त्रस्योद्भवविकासविषये संक्षिप्तं वर्णनं कुरुत। (05)

अथवा

काव्यदीपिकाया प्रथम-द्वितीय-शिखयोः विषयवस्तु विवेचनीयम्।

(ख) (i) दण्डिप्रोक्तं काव्यलक्षणं सोदाहरणं लिखत। (05)

अथवा

'के संयोगादय' इति सोदाहरणं विमृशत।

(ii) व्यञ्जनाशक्तेः स्वरूपं सोदाहरणं प्रतिपादयत। (05)

अथवा

को नाम वाचकः? इति सोदाहरणं विमृशत।

## खण्डः–य

### (आयुर्वेदः) 15 अङ्काः

5. (क) श्लोकद्वयी यथायथं व्याख्येया - (5+5=10)

(i) सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम्। ह्रासहेतुर्विशेषश्च प्रवृत्तिरुभयस्य तु।।

(ii) निर्विकारः परस्त्वात्मा सत्त्वभूतगुणेन्द्रियैः। चैतन्ये कारणं नित्यो द्रष्टा पश्यति हि क्रियाः।।

(iii) रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा। निर्वृत्तौ च विशेषे च प्रत्ययाः खादयस्त्रयः।।

**(ख)** केषाञ्चन पञ्चानां प्रश्नानां लघूत्तराणि लेखनीयानि - (5x1=5)

(i) आयुर्वेदस्य किं लक्षणम् ?

(ii) किन्नामायुर्वेदस्य प्रयोजनम् ?

(iii) को नाम मानसो दोषसङ्ग्रहः ?

(iv) मानसा दोषाः कथं प्रशाम्यन्ति ?

(v) वातपित्तशामकाः (क्रमशः) के के रसाः ?

(vi) के पित्तगुणाः ?

(vii) कीदृशः पुमान् (पुरुषः) प्रोक्तः ?

(viii) के कफप्रकोपका रसाः?

---------------x---------------